७

रघुवंशम् - वशिष्ठाश्रमे गमनम्

प्रस्तावना

अस्मिन् पाठे वयं तदनन्तरं चतुर्दश श्लोकान् पठामः। दिलीपः सन्तानं प्राप्तुकामः आसीत्। तदर्थं स शास्त्रविहितम् अनुष्ठानं कर्तुम् उद्यतः आसीत्। अतः स राज्यभारं मन्त्रिभ्यः प्रदत्तवान् इति वयं पूर्वस्मिन् पाठे पठितवन्तः। ततः च दिलीपः सुदक्षिणया सह एकस्मिन् रथे आरूढः भूत्वा सन्तानकाम्यया वसिष्ठाश्रमं प्रति गतवान्। वसिष्ठः आसीत् रघुवंशस्य कुलगुरुः। यदा एव रघुवंशीयाः नृपाः विपदि आपतन्ति स्म तदा महामुनिः वसिष्ठः तान् उपदिशति स्म। उपदेशपालनेन ते विपन्मुक्ताः अपि भवन्ति स्म। अतः दिलीपः अपि सन्तानकाम्यया वसिष्ठाश्रमं प्रति गतवान्। तयोः गमनकाले अतीव रमणीयतया मार्गपार्श्वस्थं प्रकृतिसौन्दर्यं रथारूढौ तौ दम्पती च वर्णयति कविः। अन्ते च तौ सायंकाले वसिष्ठतपोवनं प्राप्तवन्तौ।

उद्देश्यानि -

अमुं पाठं पठित्वा भवान्-

- सुदक्षिणादिलीपयोः वसिष्ठाश्रमं प्रति गमनहेतुं जानीयात्।
- कालिदासस्य वर्णनशैलीं जानीयात्।
- श्लोकानाम् अन्वयः कथं भवति इति बोद्धुं शक्नुयात्।
- समासः सन्धिः इत्यादीन् व्याकरणविषयान् अवगच्छेत्।
- अलङ्काराणां समन्वयः कथं करणीयः इति ज्ञातुं पारयेत्।
- कठिनशब्दानाम् अर्थं ज्ञातुं समर्थो भवेत्।

७.१) मूलपाठः -

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम्।।३५।।

स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव।।३६।।

मा भूदाश्रमपीडेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिवृताविव।।३७।।
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः।।३८।।
मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः।।३९।।
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु।।४०।।
श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम्।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ।।४१।।
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।।४२।।
सरसीष्वरविन्दानां वीचिविक्षोभशीतलं।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम्।।४३।।
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम्।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः।।४४।
हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।४५।।
काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।४६।।
तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः।।४७।।
स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः।।४८।।

७.२) इदानीं मूलपाठम् अवगच्छाम-

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम्।।३५।।

अन्वयः - अथ पुत्रकाम्यया तौ दम्पती प्रयतौ (सन्तौ) विधातारम् अभ्यर्च्य गुरोः वसिष्ठस्य आश्रमं जग्मतुः।

अन्वयार्थः - अथ अनन्तरं पुत्रकाम्यया पुत्रस्य इच्छया तौ सुदक्षिणादिलीपौ दम्पती जायापती प्रयतौ पवित्रौ सन्तौ विधातारं ब्रह्माणम् अभ्यर्च्य पूजयित्वा गुरोः कुलगुरोः वसिष्ठस्य महर्षेः आश्रमं तपोवनं जग्मतुः गतौ।

सरलार्थः - तदनन्तरं पुत्रप्राप्तेः इच्छा सुदक्षिणां दिलीपं च प्रेरितवती। अतः तौ जगत्स्रष्टारं ब्रह्माणं पूजयित्वा कुलगुरोः वसिष्ठस्य आश्रमं गतवन्तौ।

तात्पर्यार्थः - अनन्तरं दिलीपः ब्रह्मणः पूजां विहितवान्। ततः स स्वभार्यया सुदक्षिणया सह कुलगुरोः वसिष्ठस्य आश्रमं प्रति निर्गतवान्। वसिष्ठः रघुवंशस्य कुलगुरुः वर्तते। प्रकृतः गुरुः स एव भवति यः शिष्यस्य विपदि तं यथोचितं मार्गं प्रदर्शयति। दिलीपस्य स्वगुरौ वसिष्ठे अपरिसीमः विश्वासः आसीत्। अतः सन्तानप्राप्तिं प्रति यानि प्रतिबन्धकानि सन्ति तानि निराकर्तुं स वसिष्ठसमीपं गतवान्। यतो हि स विश्वसिति स्म यद् वसिष्ठः तस्मै अवश्यं कञ्चित् उपदेशं दास्यति। तेन च उपदेशेन तस्य सन्तानलाभः निर्बाधः भविष्यति। अतः दिलीपः सन्तानप्राप्तिकामनया वसिष्ठाश्रमं प्रति निर्गतवान्।

व्याकरणविमर्शः -

- अभ्यर्च्य - अभिपूर्वकात् अर्च्-धातोः ल्यप्प्रत्यये अभ्यर्च्य इति रूपम्।
- विधातारम् - विदधाति इति विधाता भवति। विधातृशब्दस्य प्रथमाद्विवचने विधातारम् इति रूपं भवति।
- पुत्रकाम्यया - आत्मनः पुत्रेच्छा पुत्रकाम्या, तया पुत्रकाम्यया। अत्र काम्यच्प्रत्ययः विहितः अस्ति।
- दम्पती - जाया च पतिः च इति विग्रहे समासे कृते दम्पती इति रूपम्। अत्र एकशेषसमासः भवति। इदं नित्यद्विवचनान्तम्।
- जग्मतुः - गमनार्थकस्य गम्-धातोः लिटि प्रथमपुरुषद्विवचने जग्मतुः इति रूपम्। गतवन्तौ इत्यर्थः।

सन्धिकार्यम् -

- अथाभ्यर्च्य - अथ+अभ्यर्च्य
- गुरोर्जग्मतुराश्रमम् - गुरोः+जग्मतुः+आश्रमम्
- **प्रयोगपरिवर्तनम्** - अथ पुत्रकाम्यया ताभ्यां दम्पतिभ्यां प्रयताभ्यां विधातारम् अभ्यर्च्य गुरोः वसिष्ठस्य आश्रमः जग्मे।

पाठगतप्रश्नाः -१

१. सुदक्षिणादिलीपौ कथं वसिष्ठाश्रमं गतवन्तौ।

२. दम्पतीशब्दं साधयत।

३. वसिष्ठः दिलीपस्य कः आसीत्।

४. तौ दम्पती कम् अभ्यर्च्य वसिष्ठाश्रमं गतवन्तौ-

१) विष्णुम् २) शिवम् ३) सूर्यम् ४) ब्रह्माणम्

५. तौ दम्पती कस्य मुनेः आश्रमं गतवन्तौ-

१) वसिष्ठस्य २) विश्वामित्रस्य ३) दुर्वाससः ४) कण्वस्य

७.३) इदानीं मूलपाठम् अवगच्छाम -

स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव।।३६।।

अन्वयः- स्निग्धगम्भीरनिर्घोषम् एकं स्यन्दनं प्रावृषेण्यं पयोवाहं विद्युदैरावतौ इव आस्थितौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - स्निग्धगम्भीरनिर्घोषं मधुरगम्भीरशब्दम् एकं स्यन्दनम् एकं रथं प्रावृषेण्यं वर्षाकालजातं पयोवाहं मेघं विद्युदैरावतौ तडिदैरावतौ इव आस्थितौ आरूढौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - मधुरगम्भीरशब्दयुक्तं रथम् आरुह्य सुदक्षिणादिलीपौ गतवन्तौ। यथा वर्षाकाले विद्युत् ऐरावतः च मेघम् आश्रित्य तिष्ठतः।

तात्पर्यार्थः - दिलीपः भार्यया सुदक्षिणया सह रथेन वसिष्ठाश्रमम् अगच्छत्। येन रथेन तौ गतवन्तौ स रथः मधुरः तथा गम्भीरः- इति उभयविधशब्दयुक्तः आसीत्। वर्षाकाले इन्द्रस्य हस्ती ऐरावतः विद्युत् च मेघम् आश्रित्य तिष्ठतः। तेन ऐरावतस्य मेघारोहणं सम्भवति। अपि च विद्युत् अपि मेघे एव वर्तते। अतः ऐरावतस्य विद्युत्साहचर्यं सुष्ठु अवगम्यते। अत्र दिलीपः ऐरावतः इति कविः उपमाति। सुदक्षिणा च विद्युता उपमीयते। तौ च एकस्मिन् एव रथे समारूढौ स्तः। एवं यथा ऐरावतः मेघारूढः भूत्वा विद्युत्साहचर्यं लभते तथा दिलीपः अपि एकं रथम् आरुह्य सुदक्षिणासाहचर्यं लभते। यतो हि तौ एकस्मिन् एव रथे आरूढवन्तौ। अनेन तयोः दम्पत्योः समानमनस्कता सूच्यते येन च तेषां सन्तानलाभः भविता इति अपि स्पष्टं भवति।

व्याकरणविमर्शः -

- स्निग्धगम्भीरनिर्घोषम् - स्निग्धः गम्भीरः निर्घोषः यस्य स स्निग्धगम्भीरनिर्घोषः इति बहुव्रीहिसमासः, तं स्निग्धगम्भीरनिर्घोषम्।
- आस्थितौ - आङ्पूर्वकात् स्थाधातोः क्तप्रत्यये प्रथमाद्विचने आस्थितौ इति रूपम्।
- प्रावृषेण्यम् - प्रावृषि भवः प्रावृषेण्यः, तं प्रावृषेण्यम्। वर्षतौ जातम् इत्यर्थः।

- विद्युदैरावतौ - विद्युत् च ऐरावतः च विद्युदैरावतौ इति इतरेतरयोगद्वन्द्वसमासः।

सन्धिकार्यम् -

- स्निग्धगम्भीरनिर्घोषमेकम् - स्निग्धगम्भीरनिर्घोषम्+एकम्
- स्यन्दनमास्थितौ - स्यन्दनम्+आस्थितौ
- विद्युदैरावताविव - विद्युदैरावतौ+इव
- **प्रयोगपरिवर्तनम्** - स्निग्धगम्भीरनिर्घोषम् एकं स्यन्दनं प्रावृषेण्यं पयोवाहं विद्युदैरावताभ्याम् इव आस्थिताभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

अलङ्कारोलोचना - अत्र रथः मेघेन उपमीयते। दिलीपः इन्द्रगजेन ऐरावतेन सुदक्षिणा च विद्युता उपमीयते। एवम् अत्र त्रयः उपमेयवाचकाः शब्दाः वर्तन्ते, त्रयः च उपमानवाचकाः शब्दाः वर्तन्ते। इव इति उपमावाचकः शब्दः अपि अस्ति। यथा ऐरावतः मेघम् आरूढः विद्युत्साहचर्यं लभते तथा दिलीपः रथम् आरूढः सुदक्षिणासाहचर्यं लभते इति सादृश्यम्। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -२

६. दिलीपस्य रथं कीदृशम् आसीत्।

७. सुदक्षिणादिलीपौ काभ्याम् उपमितौ।

८. प्रावृषेण्यशब्दं साधयत।

९. प्रावृट् नाम कः ऋतुः-

१) ग्रीष्मर्तुः २) वर्षर्तुः ३) वसन्तर्तुः ४) शरदृतुः

७.४) इदानीं मूलपाठम् अवगच्छाम -

मा भूदाश्रमपीडेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिवृताविव।।३७।।

अन्वयः - आश्रमपीडा मा भूत् इति परिमेयपुरःसरौ अनुभावविशेषात् तु सेनापरिवृतौ इव (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - आश्रमपीडा तपोवनक्लेशः मा भूत् न अस्तु इति अतः परिमेयपुरःसरौ अल्पपरिचारकसहितौ अनुभावविशेषात् तेजोविशेषात् तु सेनापरिवृतौ इव अनीकपरिवेष्टितौ इव (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - तपोवनस्य क्लेशादिकं मास्तु इति चिन्तयित्वा तौ दम्पती परिमितं परिचारकवर्गं स्वीकृत्य आश्रमं गतवन्तौ। किन्तु तयोः तेजःप्रभावात् तौ सेनापरिवृतौ इव प्रतीयेते स्म।

तात्पर्यार्थः - समग्रस्य धरातलस्य पतिः आसीत् दिलीपः। तस्मात् स कुत्रापि गच्छति चेत् सेनाभिः वेष्टितः भूत्वा एव गच्छति स्म। किन्तु यदा स पुत्रलाभाय स्वभार्यया सुदक्षिणया सह वसिष्ठाश्रमं गतवान् तदा अल्पसेनापरिवृतः एव गतवान्। यतो हि मुनीनाम् आश्रमः शान्तः कोलाहलशून्यः भवति। तत्र यदि दिलीपः अधिकं सैन्यं स्वीकृत्य गच्छति तर्हि शान्तिभङ्गः भवेत्। एतत् सर्वं विचिन्त्य दिलीपः अधिकसेनाः न नीतवान्। किन्तु तयोः मध्ये असामान्यं तेजः आसीत्। यदा तौ गतवन्तौ तदा ताभ्यां साकं अल्पाः एव सैनिकाः आसन्। किन्तु तेजःकारणात् तौ बहुसेनाभिः परिवृतौ आस्ताम् इति प्रतीयते स्म। एवं प्रस्तुतेन श्लोकेन सुदक्षिणायाः दिलीपस्य च तेजःप्रभावं वर्णयति कविः।

व्याकरणविमर्शः -

- आश्रमपीडा - आश्रमस्य पीडा आश्रमपीडा इति षष्ठीतत्पुरुषसमासः।
- परिमेयपुरःसरौ - परिमेयाः पुरःसराः ययोः तौ परिमेयपुरःसरौ इति बहुव्रीहिसमासः।
- अनुभावविशेषात् - अनुभावस्य विशेषः अनुभावविशेषः इति षष्ठीतत्पुरुषसमासः, तस्मात् अनुभावविशेषात्।
- सेनापरिवृतौ - सेनया परिवृतौ सेनापरिवृतौ इति तृतीयातत्पुरुषसमासः।
- मा भूत् - मा भूत् इत्यस्य मा अभूत् इत्येव प्रकृतं स्वरूपम्। अत्र माङ्योगात् न माङ्योगे इति सूत्रेणअडागमः न भवति। मा अस्तु इत्यर्थः।

सन्धिकार्यम् -

- भूदाश्रमपीडेति - भूत्+आश्रमपीडा+इति
- अनुभावविशेषात्तु - अनुभावविशेषाद्+तु
- सेनापरिवृताविव - सेनापरिवृतौ+इव
- **प्रयोगपरिवर्तनम्** - आश्रमपीडया मा भूयत इति परिमेयपुरःसराभ्याम् अनुभावविशेषात् तु सेनापरिवृताभ्याम् इव (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -३

१०. सुदक्षिणादिलीपौ कुतः सेनापरिवृतौ इव।

११. मा भूत् इति प्रयोगः कथं सिध्यति।

१२. तौ कथं परिमेयपुरःसरौः।

७.५) इदानीं मूलपाठम् अवगच्छाम -

सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः।।३८।।

अन्वयः - सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः वातैः सेव्यमानौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - सुखस्पर्शैः आनन्दजनकस्पर्शैः शालनिर्यासगन्धिभिः शालवृक्षजन्यगन्धयुक्तैः पुष्परेणूत्किरैः पुष्परेणुविक्षेपकैः आधूतवनराजिभिः वातैः पवनैः सेव्यमानौ परिचर्यमाणौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - दिलीपः सुदक्षिणा च यदा रथेन वसिष्ठाश्रमं प्रति गच्छतः स्म तदा मार्गे वायुः तौ सेवते स्म। स च शालवृक्षजन्यगन्धयुक्तः पुष्परेणुविक्षेपकः वायुः विपिनस्थवृक्षान् कम्पयति स्म।

तात्पर्यार्थः - दिलीपः पुत्रप्राप्त्युत्कण्ठितः आसीत्। अतः स पुत्रलाभाय वसिष्ठाश्रमं प्रति रथेन गतवान्। यदा स पत्न्या सह तपोवनं प्रति गच्छति स्म तदा मार्गस्थं वायुं वर्णयति कविः। शालवृक्षस्य रसात् एकः विशिष्टः गन्धः निष्पद्यते। पवनः तद्गन्धयुक्तः आसीत्। पुष्पेषु रेणवः तिष्ठन्ति। स वायुः तान् रेणून् इतस्ततः विक्षिपति स्म। अपि च स वायुः अतीव तीव्रवेगेन प्रवहति स्म। अतः तेन वायुना वने स्थिताः वृक्षाः अपि कम्पन्ते स्म। एतादृशेन मनोरमेन पवनेन तौ दम्पती सेव्यमानौ आस्ताम्। मन्यते यत् स्वयम् अरण्यपतिः एव तेन वायुना वनमार्गेन गच्छतोः सुदक्षिणादिलीपयोः सेवाम् अकरोत्।

व्याकरणविमर्शः -

- सेव्यमानौ - सेव्-धातोः कर्मणि शानच्प्रत्यये प्रथमाद्विवचने सेव्यमानौ इति रूपम्।
- सुखस्पर्शैः - सुखः स्पर्शः येषां ते सुखस्पर्शाः इति बहुव्रीहिसमासः, तैः सुखस्पर्शैः। इदं तृतीयाबहुवचनान्तं पदम्।
- शालनिर्यासगन्धिभिः - शालस्य निर्यासः शालनिर्यासः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासस्य गन्धः शालनिर्यासगन्धः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासगन्धः अस्ति येषां ते शालनिर्यासगन्धिनः, तैः शालनिर्यासगन्धिभिः।
- पुष्परेणूत्किरैः - पुष्पाणां रेणवः पुष्परेणवः इति षष्ठीतत्पुरुषसमासः। उत्किरन्ति इति उत्कीराः। पुष्परेणूनाम् उत्किराः पुष्परेणूत्किराः इति षष्ठीतत्पुरुषसमासः, तैः पुष्परेणूत्किरैः।
- आधूतवनराजिभिः - ईषत् धूता इत्यर्थे आधूता इति रूपं भवति। आधूता वनराजिः यैः ते आधूतवनराजयः इति बहुव्रीहिसमासः,तैः आधूतवनराजिभिः।

सन्धिकार्यम् -

- पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः - पुष्परेणूत्किरैः+वातैः+आधूतवनराजिभिः
- **प्रयोगपरिवर्तनम्** - सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः वातैः

सेव्यमानाभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -४

१३. कीदृशैः पवनैः तौ सेव्यमानौ आस्ताम्।

१४. शालनिर्यासगन्धिभिः इति पदं साधयत।

१५. पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः इत्यत्र सन्धिविच्छेदं कुरुत।

१६. एतेषु किं वायोः विशेषणं नास्ति-

१) सुखस्पर्शैः २) शालनिर्यासगन्धिभिः ३) वृक्षरेणूत्किरैः ४) आधूतारण्यराजिभिः

१७. सेव्यमानौ इत्यत्र सेव्-धातोः कः प्रत्ययः-

१) शानच्प्रत्ययः २) कानच्प्रत्ययः ३) चानश्प्रत्ययः ४) अन्यः कोपि

७.६) इदानीं मूलपाठम् अवगच्छाम -

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।

षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः।।३९।।

अन्वयः - रथनेमिस्वनोन्मुखैः शिखण्डिभिः द्विधाः भिन्नाः षड्जसंवादिनीः मनोभिरामाः केकाः शृण्वन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - रथनेमिस्वनोन्मुखैः स्यन्दनजन्यशब्देन ऊर्ध्वमुखैः शिखण्डिभिः मयूरैः द्विधाः द्विविधाः भिन्नाः भेदयुक्ताः षड्जसंवादिनीः षड्जस्वरेण संवदतीः मनोभिरामाः चित्तप्रियाः केकाः मयूरवाणीः शृण्वन्तौ आकर्णयन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - यदा सुदक्षिणादिलीपौ रथेन वनमध्ये गतवन्तौ तदा रथचक्रजन्यशब्दं श्रुत्वा मयूराः मुखम् उन्नमितवन्तः। किञ्च ते षड्जस्वरेण केकारवम् अपि कृतवन्तः। एतत् सर्वं श्रावं श्रावं तौ दम्पती वसिष्ठाश्रमं गतवन्तौ।

तात्पर्यार्थः - वनमार्गेण सुदक्षिणादिलीपयोः रथः गच्छति स्म। अतः तयोः रथात् गम्भीरः ध्वनिः निर्गच्छति स्म। तस्मिन् काले मार्गपार्श्वे केचन मयूराः आसन्। ते च अयं ध्वनिः मेघध्वनिः अस्ति इति चिन्तितवन्तः। मेघः ध्वनिं करोति चेत् अवश्यं वृष्टिः भविष्यति इति चिन्तयित्वा वर्षाकाले मयूराः नृत्यन्ति गायन्ति च। अत्रापि वन्याः मयूराः मेघध्वनिम् आकर्ण्य नृत्यगीतादिकम् आरब्धवन्तः। अस्मिन् श्लोके ते मयूराः षड्जस्वरेण संवतन्ते स्म इति वर्णयति कालिदासः। षड्जध्वनिः शुद्धविकृतभेदेन द्विविधः भवति। अत्र मयूराणां ध्वनिः अपि शुद्धः विकृतः इति द्विविधः आसीत्। स च केकारवः तयोः मनांसि आह्लादयति स्म। एवं मनोरमाः केकाः श्रावं श्रावं तौ सुदक्षिणादिलीपौ वसिष्ठाश्रमं गतवन्तौ।

व्याकरणविमर्शः -

- मनोभिरामाः - मनसः अभिरामाः मनोभिरामाः इति षष्ठीतत्पुरुषसमासः। इदं द्वितीयाबहुवचनान्तं रूपम्।
- शृण्वन्तौ - श्रुधातोः शतृप्रत्यये प्रथमाद्विवचने शृण्वन्तौ इति रूपम्।
- रथनेमिस्वनोन्मुखैः - रथस्य नेमयः रथनेमयः इति षष्ठीतत्पुरुषसमासः। रथनेमीनां स्वनाः रथनेमिस्वनाः इति षष्ठीतत्पुरुषसमासः। ऊर्ध्वं मुखं येषां ते उन्मुखाः इति बहुव्रीहिसमासः। रथनेमिस्वनैः उन्मुखाः रथनेमिस्वनोन्मुखाः इति तृतीयातत्पुरुषसमासः, तैः रथनेमिस्वनोन्मुखैः।
- षड्जसंवादिनीः - षड्भ्यः जायते इति षड्जः। षड्जेन संवदन्ति इति षड्जसंवादिन्यः, ताः षड्जसंवादिनीः। इदं द्वितीयाबहुवचनान्तं पदम्।
- **प्रयोगपरिवर्तनम्** - रथनेमिस्वनोन्मुखैः शिखण्डिभिः द्विधाः भिन्नाः षड्जसंवादिनीः मनोभिरामाः केकाः शृण्वद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -५

१८. मयूराः केन स्वरेण संवदन्ते स्म।

१९. ते कथम् मुखम् उन्नमितवन्तः।

२०. रथनेमिस्वनोन्मुखैः इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

२१. मयूराः केन स्वरेण केकारवं कुर्वन्ति

१) षड्जस्वरेण २) मध्यमस्वरेण ३) पञ्चमस्वरेण ४) सप्तमस्वरेण

२२. धनिः कतिविधः भवति-

१) त्रिविधः २) चतुर्विधः ३) पञ्चविधः ४) द्विविधः

७.७) इदानीं मूलपाठम् अवगच्छाम -

परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु।।४०।।

अन्वयः - अदूरोज्झितवर्त्मसु स्यन्दनाबद्धदृष्टिषु मृगद्वन्द्वेषु परस्पराक्षिसादृश्यं पश्यन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - अदूरोज्झितवर्त्मसु समीपात् त्यक्तमार्गेषु स्यन्दनाबद्धदृष्टिषु रथे आबद्धदृष्टिषु मृगद्वन्द्वेषु हरिणयुगलेषु परस्पराक्षिसादृश्यम् परस्परनयनसमानतां पश्यन्तौ अवलोकयन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - यदा वनमार्गे सुदक्षिणादिलीपयोः रथः गच्छति स्म तदा मार्गस्थाः मृगाः तमेव रथं पश्यन्ति स्म। रथः यदा समीपम् उपागतः तदा एव ते मार्गं त्यजन्ति स्म। तेषु च मृगद्वन्द्वेषु तौ परस्परं नेत्रसादृश्यं दृष्टवन्तौ।

तात्पर्यार्थः - सुदक्षिणादिलीपौ पुत्रलाभाय वनमार्गेण वसिष्ठस्य आश्रमं गतवन्तौ। वनमार्गे प्रायः मृगाः विहरन्ति। यदा तयोः रथः आगतः तदापि मृगाः मार्गमध्ये एव आसन्। किन्तु रथं दृष्ट्वा अपि ते मृगाः मार्गं न त्यक्तवन्तः। यदा रथः तेषां समीपम् आगतः तदा एव ते मार्गं त्यक्तवन्तः। एतेन ज्ञायते यत् तेषां हरिणानां मनुष्येषु विश्वासः आसीत्। यतो हि तपस्विभिः सह एव निवसन्ति स्म। किञ्च ते रथमेव पश्यन्ति स्म। यतो हि वनमार्गे रथाः प्रायः न आगच्छन्ति। अतः रथागमः विशेषः - इति कारणात् ते रथं पश्यन्ति स्म। तादृशेषु मृगयुगलेषु तौ राजराज्ञौ परस्परं नेत्रसादृश्यं दृष्टवन्तौ। अर्थात् दिलीपः मृगेषु सुदक्षिणायाः नेत्रसादृश्यं दृष्टवान्। सुदक्षिणा च मृगेषु दिलीपस्य नेत्रसादृश्यं दृष्टवान्।

व्याकरणविमर्शः -

- परस्पराक्षिसादृश्यम् - अक्ष्णोः सादृश्यम् अक्षिसादृश्यम् इति षष्ठीतत्पुरुषसमासः। परस्परम् च तत् अक्षिसादृश्यम् परस्पराक्षिसादृश्यम् इति कर्मधारयसमासः। इदं द्वितीयैकवचनान्तं रूपम्।
- अदूरोज्झितवर्त्मसु - न दूरम् अदूरम् इति नञ्तत्पुरुषसमासः। उज्झितं वर्त्म यैः तानि उज्झितवर्त्मानि इति बहुव्रीहिसमासः। अदूरं यथा तथा उज्झितवर्त्मानि अदूरोज्झितवर्त्मानि इति सुप्सुपासमासः, तेषु अदूरोज्झितवर्त्मसु।
- मृगद्वन्द्वेषु - मृगाणां द्वन्द्वानि मृगद्वन्द्वानि इति षष्ठीतत्पुरुषसमासः, तेषु मृगद्वन्द्वेषु।
- पश्यन्तौ - दृश्-धातोः शतृप्रत्यये प्रथमाद्विवचने पश्यन्तौ इति रूपम्।
- स्यन्दनाबद्धदृष्टिषु - आबद्धा दृष्टिः यैः तानि आबद्धदृष्टीनि इति बहुव्रीहिसमासः। स्यन्दने आबद्धदृष्टीनि स्यन्दनाबद्धदृष्टीनि इति सप्तमीतत्पुरुषसमासः, तेषु स्यन्दनाबद्धदृष्टिषु।

सन्धिकार्यम् -

- परस्पराक्षसादृश्यमदूरोज्झितवर्त्मसु - परस्पराक्षिसादृश्यम्+अदूरोज्झितवर्त्मसु
- **प्रयोगपरिवर्तनम्** - अदूरोज्झितवर्त्मसु स्यन्दनाबद्धदृष्टिषु मृगद्वन्द्वेषु परस्पराक्षिसादृश्यं पश्यद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -६

२३. मृगाः कथं मार्गं त्यजन्ति स्म।

२४. तौ परस्परलोचनसादृश्यं कुत्र अवलोकितवन्तौ।

२५. अदूरोज्झितवर्त्मसु इत्यत्र समासनाम विग्रहवाक्यं च लिखत।

२६. सुदक्षिणादिलीपौ मृगद्वन्द्वेषु किम् अवलोकितवन्तौ-

१) प्रेमप्राचुर्यम् २) मित्रता ३) नेत्रसादृश्यम् ४) मुखसादृश्यम्

७.८) इदानीं मूलपाठम् अवगच्छाम -

श्रेणीबन्धाद् वितन्वद्भिरस्तम्भां तोरणस्रजम्।

सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ।।४१।।

अन्वयः - श्रेणीबन्धात् अस्तम्भां तोरणस्रजं वितन्वद्भिः कलनिर्ह्रादैः सारसैः क्वचित् उन्नमिताननौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - श्रेणीबन्धात् पङ्क्तिबन्धात् अस्तम्भां स्तम्भरहितां तोरणस्रजं बहिर्द्वारि स्थितां पुष्पमालां वितन्वद्भिः कुर्वद्भिः कलनिर्ह्रादैः मधुरध्वनिना सारसैः तन्नामकैः पक्षिभिः क्वचित् कुत्रचित् उन्नमिताननौ ऊर्ध्वीकृतमुखौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - यदा दिलीपसुदक्षिणे वनमार्गेण गच्छतः स्म तदा आकाशे मधुरध्वनिं कुर्वद्भिः सारसैः स्तम्भरहिता तोरणमाला गगने निर्मिता। तां मालां दर्शं दर्शं ऊर्ध्वीकृतमुखौ तौ दम्पती वसिष्ठतपोवनं गतवन्तौ।

तात्पर्यार्थः - कोपि माननीयः जनः गृहं प्रति आगच्छति चेत् गृहस्य बहिर्द्वारि पुष्पमालां स्थापयन्ति गृहस्थाः। अनेन आगतस्य जनस्य अभ्यर्थनं क्रियते। दिलीपः सुदक्षिणा च पुत्रप्राप्तिकामनया तपोवनं प्राप्तवन्तौ। अतः आगतयोः तयोः दम्पत्योः कृते आकाशे सारसपक्षिणः तोरणमालां निर्मितवन्तः। किन्तु एषा माला सामान्या न भवति। यतः हि सामान्यमाला कमपि स्तम्भम् आधाय तिष्ठति। सारसैः गगने या माला कृता तस्याः कोपि स्तम्भः नासीत्। अतः एव अस्तम्भा तोरणस्रक् इति वर्णयति कविः। तेषां सारसानां ध्वनिः अपि सुमधुरः आसीत्। एतं सुमधुरं ध्वनिं श्रावं श्रावं गगने च सारसपक्षिणां मनोरमां मालां दर्शं दर्शं दिलीपः सुदक्षिणा च तपोवनं गतवन्तौ।

व्याकरणविमर्शः -

- श्रेणीबन्धात् - श्रेण्याः बन्धः श्रेणीबन्धः इति षष्ठीतत्पुरुषसमासः, तस्मात् श्रेणीबन्धात्।
- वितन्वद्भिः - विपूर्वकात् तन्-धातोः शतृप्रत्यये वितन्वत् इति प्रातिपदिकं निष्पद्यते। तस्य तृतीयाबहुवचने वितन्वद्भिः इति रूपम्।
- अस्तम्भाम् - अविद्यमानः स्तम्भः यस्याः सा अस्तम्भा इति नञ्बहुव्रीहिसमासः, ताम् अस्तम्भाम्।
- तोरणस्रजम् - तोरणे स्रक् तोरणस्रक् इति सप्तमीतत्पुरुषसमासः, तां तोरणस्रजम्। तोरणं नाम बहिर्द्वारम्।
- कलनिर्ह्रादैः - कलः निर्ह्रादः येषां ते कलनिर्ह्रादाः इति बहुव्रीहिसमासः,तैः कलनिर्ह्रादैः।
- उन्नमिताननौ - उत्पूर्वकात् नम्-धातोः णिचि क्तप्रत्यये उन्नमितम् इति रूपम्। उन्नमितम् आननं ययोः तौ उन्नमिताननौ इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- वितन्वद्भिरस्तम्भाम् - वितन्वद्भिः+अस्तम्भाम्
- क्वचिदुन्नमिताननौ - क्वचित्+उन्नमिताननौ
- **प्रयोगपरिवर्तनम्** - श्रेणीबन्धात् अस्तभां तोरणस्रजं वितन्वद्भिः कलनिर्ह्रादैः सारसैः क्वचित् उन्नमिताननाभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -७

२७. सारसैः कथं तोरणस्रक् कृता।

२८. तोरणस्रक् कीदृशी आसीत्।

२९. उन्नमिताननौ इति साधयत।

७.९) इदानीं मूलपाठम् अवगच्छाम -

पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।।४२।।

अन्वयः - प्रार्थनासिद्धिशंसिनः पवनस्य अनुकूलत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकवेष्टनौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - प्रार्थनासिद्धिशंसिनः मनोरथसाफल्यसूचकस्य पवनस्य वायोः अनुकूलत्वात् आनुकूल्यात् तुरगोत्कीर्णैः अश्वखुरेण उक्षिप्तैः रजोभिः धूलिभिः अस्पृष्टालकवेष्टनौ अस्पृष्टौ केशोष्णीषौ ययोः (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - सुदक्षिणादिलीपयोः गमनकाले मनोवासनासिद्धेः सूचकः वायुः अनुकूलतया प्रवहति स्म। अतः एव अश्वखुरैः उक्षिप्ताः धूलयः दिलीपस्य उष्णीषं सुदक्षिणायाः अलकं च न स्पृष्टवन्तः।

तात्पर्यार्थः - महाराजः दिलीपः भार्यया सुदक्षिणया सह महर्षेः वसिष्ठस्य तपोवनं गच्छति स्म। महर्षेः उपदेशेन पुत्रलाभः भविष्यति इति आसीत् तस्य मनोवासना। यदा तौ रथेन गतवन्तौ तदा मार्गस्थः वायुः अनुकूलेन प्रवहति स्म। अर्थात् रथः यस्यां दिशि गच्छति स्म तस्याम् एव दिशि वायुः अपि प्रवहति स्म। एवम् अनुकूलवायुप्रवाहः तयोः मनोरथसिद्धिज्ञापकः आसीत् इति कवेः आशयः। अपि च रथवाहकानाम् अश्वानां खुरैः धूलिकणाः उक्षिप्ताः भवन्ति स्म। किन्तु ताः धूलिकणाः दिलीपस्य

उष्णीषं सुदक्षिणायाः अलकं च न स्पृष्टवन्तः। एवं अनुकूलपवनस्य सहायतया तौ निर्मलौ सन्तौ वसिष्ठाश्रमं प्रति गतवन्तौ।

व्याकरणविमर्शः -

- अनुकूलत्वात् - अनुकूलस्य भावः अनुकूलत्वम्, तस्मात् अनुकूलत्वात्।
- प्रार्थनासिद्धिशंसिनः - प्रार्थनायाः सिद्धिः प्रार्थनासिद्धिः इति षष्ठीतत्पुरुषसमासः। प्रार्थनासिद्धिं शंसति इति प्रार्थनासिद्धिशंसी, तस्य प्रार्थनासिद्धिशंसिनः।
- तुरगोत्कीर्णैः - तुरगैः उत्कीर्णानि तुरगोत्कीर्णानि इति तृतीयातत्पुरुषसमासः, तैः तुरगोत्कीर्णैः। इदं तृतीयाबहुवचनान्तं रूपम्।
- अस्पृष्टालकवेष्टनौ - न स्पृष्टानि अस्पृष्टानि इति नञ्तत्पुरुषसमासः। अलकाः च वेष्टनं च अलकवेष्टनानि इति इतरेतरद्वन्द्वसमासः। अस्पृष्टानि अलकवेष्टनानि ययोः तौ अस्पृष्टालकवेष्टनौ इति बहुव्रीहिसमासः।

सन्धिकार्याणि -

- पवनस्यानुकूलत्वात् - पवनस्य+अनुकूलत्वात्
- रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ - रजोभिः+तुरगोत्कीर्णैः+अस्पृष्टालकवेष्टनौ
- **प्रयोगपरिवर्तनम् -** प्रार्थनासिद्धिशंसिनः पवनस्य अनुकूलत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकवेष्टनाभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -८

३०. पवनः कीदृशः आसीत्।

३१. पवनेन कीदृशं कार्यद्वयं कृतम्।

३२. रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ इत्यत्र सन्धिविच्छेदं कुरुत।

७.१०) इदानीं मूलपाठम् अवगच्छाम -

सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।

आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम्।।४३।।

अन्वयः - सरसीषु वीचिविक्षोभशीतलं स्वनिःश्वासानुकारिणम् अरविन्दानाम् आमोदम् उपजिघ्रन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - सरसीषु सरोवरेषु वीचिविक्षोभशीतलं तरङ्गसञ्चलेन शीतलीभूतं स्वनिःश्वासानुकारिणं निजनिःश्वासस्य अनुकरणं कुर्वन्तम् अरविन्दानां पद्मानां आमोदं सौरभम् उपजिघ्रन्तौ घ्राणेन गृह्णन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - सरोवरेषु तरङ्गसम्पर्कात् पद्मानां सौरभं शीतलम् आसीत्। सुदक्षिणादिलीपौ निजनिःश्वासम् अनुकुर्वन्तं तमेव सौरभं घ्राणेन गृह्णन्तौ सन्तौ वसिष्ठाश्रमं प्रति गतवन्तौ।

तात्पर्यार्थः - येन वनमार्गेण सुदक्षिणादिलीपौ वसिष्ठाश्रमं गतवन्तौ तस्य मार्गस्य पार्श्वे सरोवराः आसन्। तेषां सरोवराणां तरङ्गाः शीतलाः आसन्। तेषु च सरोवरेषु प्रसूनानि प्रस्फुटितानि आसन्। यदा वायुः सरोवरस्य उपरि प्रवहति स्म तदा पद्मसौरभयुक्तः भवति स्म। किञ्च शीतलतरङ्गसम्पर्कात् वायुः शीतलः अपि भवति स्म। गमनवेलायाम् एतादृशं शीतलं सुरभिं च पवनं तौ घ्रातवन्तौ। स च वायुः तयोः अर्थात् दिलीपस्य सुदक्षिणायाः च निःश्वासम् अनुकरोति स्म। एतेन तयोः निश्वासः अरविन्दात् अपि परिमलभरित आसीत् इति अवगम्यते। एवं प्रस्तुतेन श्लोकेन तयोः निःश्वासं वर्णयति कविः।

व्याकरणविमर्शः -

- वीचिविक्षोभशीतलम् - वीचीनां विक्षोभः वीचिविक्षोभः इति षष्ठीतत्पुरुषसमासः। वीचिविक्षोभेण शीतलं वीचिविक्षोभशीतलम् इति तृतीयातत्पुरुषसमासः।
- उपजिघ्रन्तौ - उपपूर्वकात् घ्राधातोः शतृप्रत्यये प्रथमाद्विवचने उपजिघ्रन्तौ इति रूपम्।
- स्वनिःश्वासानुकारिणम् - स्वस्य निःश्वासः स्वनिःश्वासः इति षष्ठीतत्पुरुषसमासः। स्वनिःश्वासम् अनुकरोति इत्यर्थे स्वनिःश्वासानुकारी इति रूपम्, तं स्वनिःश्वासानुकारिणम्।

सन्धिकार्यम् -

- सरसीष्वरविन्दानाम् - सरसीषु+अरविन्दानाम्
- आमोदमुपजिघ्रन्तौ - आमोदम्+उपजिघ्रन्तौ
- **प्रयोगपरिवर्तनम्** - सरसीषु अरविन्दानां वीचिविक्षोभशीतलं स्वनिःश्वासानुकारिणम् अरविन्दानाम् आमोदः उपजिघ्रद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -९

३३. अरविन्दानां परिमलः कथं शीतलः जातः।

३४. आमोदः कम् अनुकृतवान्।

३५. दम्पत्योः निःश्वासः कीदृशः इति सिध्यति।

७.११) इदानीं मूलपाठम् अवगच्छाम -

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम्।

अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः।।४४।।

अन्वयः - आत्मविसृष्टेषु यूपचिह्नेषु ग्रामेषु यज्वनाम् अर्घ्यानुपदम् अमोघा आशिषः प्रतिगृह्णन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - आत्मविसृष्टेषु स्वदत्तेषु यूपचिह्नेषु यूपचिह्नयुक्तेषु ग्रामेषु यज्वनां यज्ञं कुर्वतां याज्ञिकानाम् अर्घ्यानुपदम् अर्घ्यग्रहणानन्तरं अमोघाः सफला आशिषः आशीर्वादान् प्रतिगृह्णन्तौ स्वीकुर्वन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - गमनकाले ग्रामेषु याज्ञिकानाम् सफलान् आशीर्वादान् तौ स्वीकृतवन्तौ। ते च ग्रामाः दिलीपेन एव प्रदत्ताः अपि तु यूपचिह्नयुक्ताः आसन्।

तात्पर्यार्थः - दिलीपः महान् दाता आसीत्। अतः यज्ञसम्पादनात् परं स याज्ञिकेभ्यः सम्पूर्णं ग्रामम् अपि ददाति स्म। यतो हि सम्पूर्णा अपि धरणी तदधीना आसीत्। तेषु ग्रामेषु यज्ञसमये पशुबलिः भवति। बलेः पूर्वं पशवः यस्मिन् दारुणि बद्धीकृत्य संस्थाप्यन्ते तद् दारु यूपदारु इति प्रसिद्धम्। तेषु ग्रामेषु च प्रायः यज्ञादिकं भवति स्म। अतः बहुत्र यूपदारूणि दृश्यन्ते स्म। तेषु च ग्रामेषु याज्ञिकाः निवसन्ति स्म। दिलीपः गच्छति इति ज्ञात्वा ते मार्गपार्श्वम् आगताः। ते पण्डिताः दम्पतिभ्यां आशीर्वादान् अपि प्रदत्तवन्तः। ते च आशीर्वादाः दिलीपसुदक्षिणयोः अभीष्टसाधकाः आसन्। अतः तौ तान् आशीर्वादान् गृहीत्वा वसिष्ठाश्रमं प्रति गतवन्तौ।

व्याकरणविमर्शः -

- आत्मविसृष्टेषु - आत्मना विसृष्टाः आत्मविसृष्टाः इति तृतीयातत्पुरुषसमासः, तेषु आत्मविसृष्टेषु।
- यूपचिह्नेषु - यूपाः एव चिह्नानि येषां ते यूपचिह्नाः इति बहुव्रीहिसमासः, तेषु यूपचिह्नेषु।
- यज्वनाम् - अयजन्त इति यज्वानः, तेषां यज्वनाम्। इदं षष्ठीबहुवचनान्तं रूपम्।
- अमोघाः - न मोघाः अमोघाः इति नञ्तत्पुरुषसमासः। इदं द्वितीयैकवचनान्तं पदम्।
- प्रतिगृह्णन्तौ - प्रतिपूर्वकात् ग्रह्-धातोः शतृप्रत्यये प्रथमाद्विवचने प्रतिगृह्णन्तौ इति रूपम्।
- अर्घ्यानुपदम् - अर्घाय इदम् इति अर्थे यत्प्रत्यये अर्घ्यशब्दः निष्पद्यते। पदस्य पश्चात् अनुपदम् इति अव्ययीभावसमासः। अर्घ्यस्य अनुपदम् अर्घ्यानुपदम् इति षष्ठीतत्पुरुषसमासः।
- आशिषः - आशिष्-शब्दस्य द्वितीयाबहुवचने आशिषः इति रूपम्।

सन्धिकार्यम् -

- ग्रामेष्वात्मविसृष्टेषु - ग्रामेषु+आत्मविसृष्टेषु
- प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः - प्रतिगृह्णन्तौ+अर्घ्यानुपदम्+आशिषः
- **प्रयोगपरिवर्तनम्** - आत्मविसृष्टेषु यूपचिह्नेषु ग्रामेषु यज्वनाम् अर्घ्यानुपदम् अमोघाः आशिषः

प्रतिगृह्णद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -१०

३६. ग्रामाः केन केभ्यः दत्ताः।

३७. यज्वनाम् आशिषः कीदृश्यः आसन्।

३८. प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः इत्यस्य सन्धिविच्छेदं कुरुत।

७.१२) इदानीं मूलपाठम् अवगच्छाम -

हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।

नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।४५।।

अन्वयः - हैयङ्गवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - हैयङ्गवीनं ह्यस्तनेन गोदोहनेन उत्पन्नं घृतम् आदाय गृहीत्वा उपस्थितान् समीपस्थितान् घोषवृद्धान् आभीरपल्लीवृद्धजनान् वन्यानाम् अरण्ये जातानां मार्गशाखिनां मार्गस्थवृक्षाणां नामधेयानि नामानि पृच्छन्तौ जिज्ञासमानौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - दिलीपः सुदक्षिणा च मार्गे बहून् वृक्षान् दृष्टवान् येषां नामानि तैः न ज्ञायते। यदा घोषवृद्धाः सद्योजातं घृतं स्वीकृत्य दिलीपस्य समीपम् आगतवन्तः तदा दिलीपःतेषां वृक्षाणां नामानि तान् पृष्टवान्।

तात्पर्यार्थः - राजा वृद्धानां सेवकः भवेत् इति मनुः उक्तवान्। अतः दिलीपः अपि आभीरपल्ल्यां वसतः वृद्धान् प्रति अत्यन्तं श्रद्धाशीलः आसीत्। राजा वनम् अतिक्रम्य घोषपल्लीं प्रविष्टवान्। महाराजः क्षितीश्वरः दिलीपः आगतः इति अवलोक्य घोषपल्लीस्थाः वृक्षाः हैयङ्गवीनं स्वीकृत्य समुपस्थिताः आसन्। ह्यः गोदोहनेन यद् दुग्धम् उत्पन्नम् तेन दुग्धेन निर्मितं घृतं हैयङ्गवीनम् इति कथ्यते। दिलीपः समुपस्थितान् तान् अवलोक्य अतीव प्रसन्नः जातः। मार्गे स कांश्चन वृक्षान् दृष्टवान् येषां नामानि स न जानन्ति। घोषवृद्धाः अस्मिन् विषये अधिकज्ञानसम्पन्नः आसीत् इति दिलीपः ज्ञातवान्। अतः दिलीपः वृक्षनामानि तेभ्यः ज्ञात्वा वसिष्ठाश्रमं प्रति निर्गतवान् इति तात्पर्यम्।

व्याकरणविमर्शः -

- आदाय - आङ्पूर्वकात् दाधातोः ल्यप्प्रत्यये आदाय इति रूपम्।
- घोषवृद्धान् - घोषे वृद्धाः घोषवृद्धाः इति सप्तमीतत्पुरुषसमासः, तान् घोषवृद्धान्।
- उपस्थितान् - उपपूर्वकात् स्थाधातोः क्तप्रत्यये उपस्थित इति प्रातिपदिकं निष्पद्यते। तस्य

द्वितीयाबहुवचने उपस्थितान् इति रूपम्।

- नामधेयानि - नामानि एव तानि इति अर्थे नामशब्दात् धेयप्रत्यये नामधेयानि इति रूपम्। इदं द्वितीयाबहुवचनान्तं पदम्।
- पृच्छन्तौ - प्रच्छ्-धातोः शतृप्रत्यये प्रथमाद्विवचने पृच्छन्तौ इति रूपम्।
- वन्यानाम् - वने भवाः वन्याः, तेषां वन्यानाम्।
- मार्गशाखिनाम् - मार्गे शाखिनः मार्गशाखिनः इति सप्तमीतत्पुरुषसमासः, तेषां मार्गशाखिनाम्।

सन्धिकार्याणि -

- हैयङ्गवीनमादाय - हैयङ्गवीनम्+आदाय
- घोषवृद्धानुपस्थितान् - घोषवृद्धान्+उपस्थितान्
- **प्रयोगपरिवर्तनम्** - हैयङ्गवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -११

३९. किं नाम हैयङ्गवीनम्।
४०. तौ मार्गवृक्षाणां नामानि के उक्तवन्तः।
४१. घोषवृद्धाः किम् आदाय समुपस्थिताः आसन्।
४२. सुदक्षिणादिलीपौ कुत्र आगतवन्तौ-
१) ब्राह्मणग्रामम् २) जलाशयम् ३) यज्ञस्थानम् ४) आभीरग्रामम्

७.१३) इदानीं मूलपाठम् अवगच्छाम -

काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।४६।।

अन्वयः - व्रजतोः शुद्धवेषयोः तयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसोः इव योगे (सति) कापि अभिख्या आसीत्।

अन्वयार्थः - व्रजतोः गच्छतोः शुद्धवेषयोः पवित्रवस्त्रयोः तयोः सुदक्षिणादिलीपयोः हिमनिर्मुक्तयोः तुषाररहितयोः चित्राचन्द्रमसोः इव चित्रानामकनक्षत्रचन्द्रयोः इव योगे संयोगे सति कापि काचित् अभिख्या शोभा आसीत् अभवत्।

सरलार्थः - वसिष्ठाश्रमं गच्छन्तौ पवित्रवस्त्रधारिणौ सुदक्षिणादिलीपौ शोभायुक्तौ आस्ताम्। यथा संयोगे सति चित्रानक्षत्रचन्द्रौ च शोभायुक्तौ भवतः।

तात्पर्यार्थः - दिलीपः सुदक्षिणा च पवित्रवस्त्रं धृत्वा वसिष्ठाश्रमं प्रति गतवन्तौ। अत्र गच्छतोः तयोः वर्णनाय कविः एकम् उपमानम् अपि प्रदत्तवान्। चैत्रमासस्य पूर्णिमायां चित्रानक्षत्रं चन्द्रेण सह मिलति। यदा चित्राचन्द्रौ मिलतः तदा तौ अपूर्वशोभायुक्तौ दृश्येते। अत्र सुदक्षिणां चित्रानक्षत्रेण दिलीपं च चन्द्रेण सह उपमाति कविः। सुदक्षिणा दिलीपः च एकं रथम् आरुह्य तपोवनं प्रति गतवन्तौ। अतः तयोः योगे अपि अपूर्वा शोभा आसीत्। यथा चित्राचन्द्रमसोः योगे शोभा तिष्ठति। एवं संयुक्तयोः तयोः वर्णनेन सन्तानलाभे तयोः अनुकूलता एव प्रदर्शिता कविना। अर्थात् येन कारणेन ते तपोवनं गतवन्तौ तत् अवश्यं सिद्धं भविष्यति इति अभिप्रायः। अनेन श्लोकेन कालिदासस्य ज्योतिश्शास्त्रज्ञानं सम्यक् आसीत् इति स्पष्टं भवति।

व्याकरणविमर्शः -

व्रजतोः - व्रज्-धातोः शतृप्रत्यये व्रजत् इति प्रातिपदिकं निष्पद्यते। तस्य षष्ठीद्विवचने व्रजतोः इति रूपम्। इदं षष्ठीद्विवचनान्तं पदम्।

शुद्धवेषयोः - शुद्धः वेषः ययोः तौ शुद्धवेषौ इति बहुव्रीहिसमासः, तयोः शुद्धवेषयोः।

हिमनिर्मुक्तयोः - हिमात् निर्मुक्तौ हिमनिर्मुक्तौ इति पञ्चमीतत्पुरुषसमासः, तयोः हिमनिर्मुक्तयोः।

चित्राचन्द्रमसोः - चित्रा च चन्द्रमाः च चित्राचन्द्रमसौ इति इतरेतरद्वन्द्वसमासः, तयोः चित्राचन्द्रमसोः।

सन्धिकार्यम् -

- काप्यभिख्या - कापि+अभिख्या
- तयोरासीद् - तयोः+आसीद्
- हिमनिर्मुक्तयोर्योगे - हिमनिर्मुक्तयोः+योगे
- चित्राचन्द्रमसोरिव - चित्राचन्द्रमसोः+इव
- **प्रयोगपरिवर्तनम्** - व्रजतोः शुद्धवेषयोः तयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसोः इव योगे (सति) कया अपि अभिख्यया अभूयत।

अलङ्कारालोचना- अत्र दिलीपः चन्द्रेण उपमितः। राज्ञी सुदक्षिणा चित्रानक्षत्रेण उपमिता। इव इति उपमावाचकः शब्दः वर्तते। यथा चित्राचन्द्रमसोः योगे अपूर्वा शोभा तिष्ठति तथा शोभा सुदक्षिणादिलीपयोः योगे अपि आसीत् इति सादृश्यम्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -१२

४३. चित्राचन्द्रमसोः योगः कदा भवति।

४४. अभिख्या नाम किम्।

४५. अत्र सुदक्षिणादिलीपौ काभ्याम् उपमितौ।

४६. अत्र दिलीपः केन उपमितः-

१) चन्द्रेण २) चित्रानक्षत्रेण ३) नक्षत्रेण ४) सूर्येण

४७. हिमनिर्मुक्तयोः इत्यत्र कः समासः-

१) तृतीयातत्पुरुषः २) चतुर्थीतत्पुरुषः ३) पञ्चमीतत्पुरुषः ४) सप्तमीतत्पुरुषः

७.१४) इदानीं मूलपाठम् अवगच्छाम -

तत्तद् भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः।

अपि लङ्घितमध्वानं बुबुधे न बुधोपमः।।४७।।

अन्वयः - प्रियदर्शनः बुधोपमो भूमिपतिः पत्न्यै तत्तद् दर्शयन् लङ्घितम् अपि अध्वानं न बुबुधे।

अन्वयार्थः - प्रियदर्शनः अभीष्टदर्शनः बुधोपमः पण्डितसदृशः भूमिपतिः राजा दिलीपः पत्न्यै भार्यायै सुदक्षिणायै तत्तद् अद्भूतं वस्तु दर्शयन् अवलोकयन् लङ्घितम् अपि अतिवाहितम् अपि अध्वानं मार्गं न बुबुधे न ज्ञातवान्।

सरलार्थः - प्रियदर्शनः बुधसदृशः राजा दिलीपः यदा वसिष्ठाश्रमं प्रति गच्छति स्म तदा राज्यस्य कुत्र किम् अस्ति इत्यादिकं सर्वं भार्यां सुदक्षिणां दर्शितवान्। तेन सः अतिक्रान्तं मार्गम् अपि न ज्ञातवान्।

तात्पर्यार्थः - दिलीपः सुदर्शनः पुरुषः आसीत्। अतः सर्वे एव तं द्रष्टुम् इच्छन्ति स्म। अतः स प्रियदर्शनः इति कविः वर्णयति। चन्द्रस्य पुत्रः भवति बुधः। राजा दिलीपः बुधग्रहसदृशः आसीत्। अथवा बुधः इत्यस्य अर्थः पण्डितः भवति। तेन दिलीपः पण्डितः आसीत् इति सूच्यते। दिलीपः स्वराज्यस्य विषये सर्वं जानाति स्म। अत एव स यदा वसिष्ठाश्रमं गतवान् तदा राज्ये किं कुत्र अस्ति इत्येतत् सर्वं सुदक्षिणायाः सविधे वर्णितवान्। एवं वर्णयन् स बहुमार्गम् अतिक्रान्तवान्। किन्तु स एतावदेकाग्रतया वर्णयति स्म यत् कियान् मार्गः अतिक्रान्तः इति न ज्ञातवान्। एतेन दिलीपः समीचीनः वक्ता आसीत् इति अपि ज्ञायते।

व्याकरणविमर्शः -

- भूमिपतिः - भूमेः पतिः भूमिपतिः इति षष्ठीतत्पुरुषसमासः।
- दर्शयन् - दृश्धातोः णिच्प्रत्यये दृशिधातुः निष्पद्यते। ततः शतृप्रत्यये प्रथमैकवचने दर्शयन् इति रूपम्।
- प्रियदर्शनः - प्रियं दर्शनं यस्य सः प्रियदर्शनः इति बहुव्रीहिसमासः।
- अध्वानम् - अध्वन्-शब्दस्य द्वितीयैकवचने अध्वानम् इति रूपम्।
- बुबुधे - बुध्-धातोः लिटि प्रथमपुरुषैकवचने बुबुधे इति रूपम्।
- बुधोपमः - बुधः उपमा यस्य स बुधोपमः इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- लङ्घितमध्वानम् - लङ्घितम्+अध्वानम्
- **प्रयोगपरिवर्तनम्** - प्रियदर्शनेन बुधोपमेन भूमिपतिना पत्न्यै तत्तद् दर्शयता लङ्घितः अपि अध्वा न बुबुधे।

पाठगतप्रश्नाः -१३

४८. दिलीपः अतिक्रान्तं मार्गं कथं न ज्ञातवान्।

४९. बुबुधे इति रूपं कस्य धातोः कस्मिन् लकारे भवति।

५०. बुधः कस्य पुत्रः-

१) सूर्यस्य २) भूमेः ३) चन्द्रस्य ४) शुक्रस्य

७.१५) इदानीं मूलपाठम् अवगच्छाम -

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।

सायं संयमिनस्तस्य महर्षेर्महिषीसखः।।४८।।

अन्वयः - दुष्प्रापयशाः श्रान्तवाहनः महिषीसखः स सायं संयमिनः तस्य महर्षेः आश्रमं प्रापत्।

अन्वयार्थः - दुष्प्रापयशाः दुर्लभकीर्तिमान् श्रान्तवाहनः क्लान्ततुरङ्गः महिषीसखः सुदक्षिणासहचरः सः दिलीपः सायं सन्ध्याकाले संयमिनः नियमं पालयतः तस्य महर्षेः वसिष्ठस्य आश्रमं तपोवनं प्रापत् प्राप्तवान्।

सरलार्थः - दुर्लभयशसः अधिकारी राजा दिलीपः पुत्रप्राप्तिकाम्यया वसिष्ठाश्रमं प्रति निर्गतवान्। अन्तिमे च स यदा सन्ध्याकाले संयमिमहर्षेः वसिष्ठस्य आश्रमं प्राप्तवान् तदा तस्य रथवाहकाः अश्वाः अपि श्रान्ताः आसन्।

तात्पर्यार्थः - इतः पूर्वं कविः सन्तानप्राप्तये दिलीपस्य वसिष्ठाश्रमं प्रति आगमनं मार्गे ताभ्यां दृष्टं प्रकृतिसौन्दर्यम् इत्यादिकं सर्वं वर्णितवान्। एवं बहुकालात् परं यदा तौ वसिष्ठाश्रमं प्राप्तवन्तौ तदा सन्ध्याकालः आसीत्। मार्गश्रमकारणात् स्यन्दनवाहकाः अश्वाः अपि अतीव क्लान्ताः आसन्। वसिष्ठः संयमी आसीत्। संयमिनः एव ध्यानयोगेन कालत्रयं द्रष्टुं समर्थाः भवन्ति। अतः एव दिलीपः पुत्रलाभाय तस्य तपोवनम् आगतवान्। यतो हि दिलीपः जानाति स्म यत् कुलगुरुः वसिष्ठः ध्यानयोगेन सन्तानप्राप्तिप्रतिबन्धकं ज्ञास्यति। किञ्च तत् निराकर्तुं अवश्यं कञ्चित् उपायं वदिष्यति। अतः एव दिलीपस्य भार्यया सुदक्षिणया सह वसिष्ठतपोवनं प्रति आगमनम्।

व्याकरणविमर्शः -

- दुष्प्रापयशाः - दुष्प्रापं यशः यस्य स दुष्प्रापयशाः इति बहुव्रीहिसमासः।
- प्रापत् - प्रपूर्वकात् आप्-धातोः लुङि प्रथमपुरुषैकवचने प्रापत् इति रूपम्।
- श्रान्तवाहनः - श्रान्तानि वाहनानि यस्य सः श्रान्तवाहनः इति बहुव्रीहिसमासः।
- संयमिनः - संयमः अस्ति यस्य स संयमी, तस्य संयमिनः।
- महिषीसखः - महिष्याः सखा महिषीसखः इति षष्ठीतत्पुरुषसमासः।
- महर्षेः- महान् चासौ ऋषिः च महर्षिः इति कर्मधारयसमासः, तस्य महर्षेः। इदं षष्ठ्येकवचनान्तं रूपम्।

सन्धिकार्यम् -

- प्रापदाश्रमम् - प्रापत्+आश्रमम्
- संयमिनस्तस्य - संयमिनः+तस्य
- महर्षेर्महिषीसखः - महर्षेः+महिषीसखः
- **प्रयोगपरिवर्तनम्** - दुष्प्रापयशसा श्रान्तवाहनेन महिषीसखेन तेन सायं संयमिनः तस्य महर्षेः आश्रमः प्रापि।

पाठगतप्रश्नाः -१४

५१. दिलीपः कदा वसिष्ठाश्रमं प्राप्तवान्।

५२. महिषीसखः इत्यस्य किं विग्रहवाक्यं समासनाम च किम्।

पाठसारः

तदनन्तरं दिलीपः ब्रह्माणं पूजयित्वा कुलगुरोः वसिष्ठस्य आश्रमं रथेन गतवान्। यथा वर्षाकाले मेघारूढः ऐरावतः विद्युत्साहचर्यं लभते तथा रथारूढः दिलीपः सुदक्षिणासाहचर्यं लब्धवान्। आश्रमपरिसरः शान्तः भवति। यदि तत्र अधिकाः जनाः गच्छन्ति तर्हि आश्रमे शान्तिभङ्गः स्यात्। अतः तौ अल्पसेनापरिवृतौ एव गतवन्तौ। यदा तौ वनमार्गेण गतवन्तौ तदा वायुः तौ सेवते स्म। स वायुः शालवृक्षरसजन्येन गन्धेन युक्तः पुष्परेणूनां विक्षेपकः विपिनस्थवृक्षान् कम्पयति स्म। मयूराः रथध्वनिं श्रुत्वा मुखम् उन्नमितवन्तः। रथध्वनिं मेघध्वनिं मत्वा ते षड्जस्वरेण केकारवम् अकुर्वन्। ताः केकाः श्रावं श्रावं तौ दम्पती वसिष्ठाश्रमं गतवन्तौ। यदा रथः वनमार्गेण गच्छति स्म तदा मार्गस्थमृगाः समीपात् मार्गं त्यजन्ति स्म। तेषु मृगद्वन्द्वेषु तौ दम्पती परस्परं नेत्रसादृश्यं दृष्टवन्तौ। गगने सारसाः पङ्क्तिबद्धाः सन्तः स्तम्भरहितां तोरणमालां निर्मितवन्तः। तां तोरणमालां तौ दम्पती दृष्टवन्तौ। यस्यां दिशि रथः गच्छति स्म तस्याम् एव दिशि वायुः प्रवहति स्म। एवम् अनुकूलः पवनः तयोः मनोरथः अवश्यं सफलः भविष्यति

इति सूचयति स्म। रथवाहकानाम् अश्वानां खुरैः उक्षिप्ताः धूलिकणाः तौ न स्पृष्टवन्तौ। सरोवरेषु उत्पन्नानाम् अरविन्दानां परिमलः तरङ्गसञ्चलेन शीतलः आसीत्। तादृशः आमोदः सुदक्षिणादिलीपयोः निःश्वासम् अनुकृतवान्। तेन तयोः निःश्वासः अरविन्दाद् अपि परिमलभरितः आसीत् इति सूच्यते। ततः दिलीपदत्तेषु यूपचिह्नयुक्तेषु ग्रामेषु प्रविष्टवन्तौ। तत्र च यज्वनां सफलान् आशीर्वादान् तौ गृहीतवन्तौ। आभीरपल्लीषु घोषवृद्धाः हैयङ्गवीनम् आदाय समुपस्थिताः आसन्। तेभ्यः च वन्यानां मार्गवृक्षाणां नामानि ज्ञातवान् दिलीपः। चैत्रमासस्य पूर्णिमायां चित्रानक्षत्रचन्द्रौ च संयुक्तौ भवतः। तदा तयोः योगे यथा शोभा तिष्ठति तथा शोभा सुदक्षिणादिलीपयोः योगे अपि आसीत्। गमनकाले दिलीपः मार्गदृश्यानि पत्नीं सुदक्षिणां दर्शितवान्। एवं कुर्वन् सः अतिवाहितम् अपि मार्गं न ज्ञातवान्। अन्ते च सायंकाले तौ दम्पती सुदक्षिणादिलीपौ यदा महर्षेः वसिष्ठस्य आश्रमं प्राप्तवन्तौ तदा रथवाहकाः अश्वाः अपि श्रान्ताः आसन्।

पाठान्तप्रश्नाः -

१. समासेन पाठसारं वर्णयत।

२. एकं रथं समारूढौ सुदक्षिणादिलीपौ कथं वर्णितौ कविना।

३. प्रकृतिवर्णने पवनं कथं वर्णितवान् कविः।

४. मयूराणां विषये कविः किम् उक्तवान्।

५. परस्पराक्षसादृश्यम् इत्यादिश्लोकं वर्णयत।

६. आमोदः तयोः निश्वासम् अनुकृतवान् इति कथनेन कविः किं प्रतिपादयितुम् इच्छति।

७. दिलीपेन दत्ताः ग्रामाः कीदृशाः आसन्- सविस्तारं वर्णयत।

८. सुदक्षिणादिलीपयोः वसिष्ठाश्रमगमनं वर्णयत।

९. स्तम्भयोः लिखितान् परस्परसम्बद्धान् मेलयत।

स्तम्भः-क	स्तम्भः-ख
१. बुबुधे	१. सुदक्षिणादिलीपौ
२. सुखस्पर्शैः	२. केकाः
३. मार्गशाखिनाम्	३. मृगद्वन्द्वम्
४. षड्जसंवादिनीः	४. पवनैः
५. शोभा	५. अवगतवान्
६. महर्षिः	६. वन्यानाम्
७. परस्पराक्षिसादृश्यम्	७. अभिख्या
८. चित्राचन्द्रमसौ	८. वसिष्ठः

उत्तरम् - १-५,२-४,३-६,४-२,५-७,६-८,७-३,८-१.

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. सुदक्षिणादिलीपौ पुत्रकाम्यया वसिष्ठाश्रमं गतवन्तौ।

२. जाया च पतिः च इति विग्रहे समासे कृते दम्पती इति रूपम्। अत्र एकशेषसमासः भवति। इदं नित्यद्विवचनान्तम्।

३. वसिष्ठः दिलीपस्य कुलगुरुः आसीत्।

४. ४

५. १

उत्तराणि-२

६. दिलीपस्य रथः स्निग्धगम्भीरनिर्घोषः आसीत्।

७. सुदक्षिणादिलीपौ विद्युदैरावताभ्याम् उपमितौ।

८. प्रावृषि भवः प्रावृषेण्यः, तं प्रावृषेण्यम्। इदं द्वितीयैकवचनान्तं रूपम्। वर्षर्तौ जातम् इत्यर्थः।

९. २

उत्तराणि-३

१०. सुदक्षिणादिलीपौ अनुभावविशेषात् सेनापरिवृतौ इव।

११. मा भूत् इत्यस्य मा अभूत् इत्येव प्रकृतं स्वरूपम्। अत्र माङ्योगात् न माङ्योगे इति सूत्रेण अडागमः न भवति। मा अस्तु इत्यर्थः।

१२. आश्रमपीडा मा भूत् इति तौ परिमेयपुरःसरौ।

उत्तराणि-४

१३. सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः पवनैः तौ सेव्यमानौ आस्ताम्।

१४. शालस्य निर्यासः शालनिर्यासः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासस्य गन्धः शालनिर्यासगन्धः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासगन्धः अस्ति येषां ते शालनिर्यासगन्धिनः, तैः शालनिर्यासगन्धिभिः।

१५. पुष्परेणूत्किरैः+वातैः+आधूतवनराजिभिः

१६. ३

१७. १

उत्तराणि-५

१८. मयूराः षड्जस्वरेण संवदन्ते स्म।

१९. ते रथचक्रजन्यशब्दं श्रुत्वा मुखम् उन्नमितवन्तः।

२०. रथस्य नेमयः रथनेमयः इति षष्ठीतत्पुरुषसमासः। रथनेमीनां स्वनाः रथनेमिस्वनाः इति षष्ठीतत्पुरुषसमासः। ऊर्ध्वं मुखं येषां ते उन्मुखाः इति बहुव्रीहिसमासः। रथनेमिस्वनैः उन्मुखाः रथनेमिस्वनोन्मुखाः इति तृतीयातत्पुरुषसमासः, तैः रथनेमिस्वनोन्मुखैः।

२१. १

२२. २

उत्तराणि-६

२३. मृगाः रथे समीपम् आगते सति मार्गं त्यजन्ति स्म।

२४. तौ परस्परलोचनसादृश्यं मृगद्वन्द्वेषु अवलोकितवन्तौ।

२५. न दूरम् अदूरम् इति नञ्तत्पुरुषसमासः। उज्झितं वर्त्म यैः तानि उज्झितवर्त्मानि इति बहुव्रीहिसमासः। अदूरं यथा तथा उज्झितवर्त्मानि अदूरोज्झितवर्त्मानि इति सुप्सुपासमासः, तेषु अदूरोज्झितवर्त्मसु।

२६. ३

उत्तराणि-७

२७. सारसैः पङ्क्तिबन्धात् तोरणस्रक् कृता।

२८. तोरणस्रक् स्तम्भरहिता आसीत्।

२९. उत्पूर्वकात् नम्-धातोः णिचि क्तप्रत्यये उन्नमितम् इति रूपम्। उन्नमितम् आननं ययोः तौ उन्नमिताननौ इति बहुव्रीहिसमासः।

उत्तराणि-८

३०. पवनः अनुकूलः आसीत्।

३१. पवनेन मनोरथसाफल्यस्य सूचनं तुरगोत्कीर्णानां धूलीनाम् अपसारणं च इति कार्यद्वयं कृतम्।

३२. रजोभिः+तुरगोत्कीर्णैः+अस्पृष्टालकवेष्टनौ

उत्तराणि-९

३३. अरविन्दानां परिमलः तरङ्गसञ्चलेन शीतलः जातः।

३४. आमोदः सुदक्षिणादिलीपयोः निःश्वासम् अनुकृतवान्।

३५. दम्पत्योः निःश्वासः अरविन्दाद् अपि परिमलभरितः इति सिध्यति।

उत्तराणि-१०

३६. ग्रामाः दिलीपेन याज्ञिकब्राह्मणेभ्यः दत्ताः।

३७. यज्वनाम् आशिषः अमोघाः आसन्।

३८. प्रतिगृह्णन्तौ+अर्घ्यानुपदम्+आशिषः

उत्तराणि-११

३९. ह्यः गोदोहनेन यद् दुग्धम् उत्पन्नम् तेन दुग्धेन निर्मितं घृतं हैयङ्गवीनम् इति कथ्यते।

४०. तौ मार्गवृक्षाणां नामानि घोषवृद्धाः उक्तवन्तः।

४१. घोषवृद्धाः हैयङ्गवीनम् आदाय समुपस्थिताः आसन्।

४२. ४

उत्तराणि-१२

४३. चित्राचन्द्रमसोः योगे चैत्रमासस्य पूर्णिमायां भवति।

४४. अभिख्या नाम शोभा।

४५. अत्र सुदक्षिणादिलीपौ चित्राचन्द्राभ्याम् उपमितौ।

४६. १

४७. ३

उत्तराणि-१३

४८. दिलीपः पत्न्यै सुदक्षिणायै मार्गदृश्यानि दर्शयन् अतिक्रान्तं मार्गं न ज्ञातवान्।

४९. बुध्-धातोः लिटि प्रथमपुरुषैकवचने बुबुधे इति रूपम्।

५०. ३

उत्तराणि-१४

५१. दिलीपः सायंकाले वसिष्ठाश्रमं प्राप्तवान्।

५२. महिष्याः सखा महिषीसखः इति षष्ठीतत्पुरुषसमासः।



सन्दर्भग्रन्थसूचिः -

- कालिदासः। रघुवंशम्(चन्द्रकलाख्यया व्याख्यया हिन्द्यनुवादेन च विभूषितम्)। रेग्मी-आचार्यशेषराजशर्मा(व्याख्याकारः)। २००९। चौखम्बा-सुरभारती-प्रकाशन। वाराणसी।
- कालिदासः। रघुवंशम्। वन्द्योपाध्याय-उदयचन्द्रः, वन्द्योपाध्याय-अनिता(व्याख्याकर्तारौ)। २००३। संस्कृत-वुक-डिपो। कलिकाता।

॥ इति सप्तमः पाठः ॥